# Shivashankara Stuti

# शिवशङ्करस्तुतिः

## Document Information

Text title : Shivashankara Stuti by Parashuram

File name : shivashankarastutiHparashurAma.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : brahmANDapurANam, madhyabhAgaH 3 upodghAtapAdaH | adhyAya: 25 - jAmdagneyakRitashivastutiH | 5 - 31 ||

Latest update : March 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2023

*sanskritdocuments.org*

# शिवशङ्करस्तुतिः

परशुराम उवाच -
नमस्ते देवदेवेश नमस्ते परमेश्वर ।
नमस्ते जगतो नाथ नमस्ते त्रिपुरान्तक ॥ १॥

नमस्ते सकलाध्यक्ष नमस्ते भक्तवत्सल ।
नमस्ते सर्वभूतेश नमस्ते वृषभध्वज ॥ २॥

नमस्ते सकलाधीश नमस्ते करुणाकर ।
नमस्ते सकलावास नमस्ते नीललोहित ॥ ३॥

नमः सकलदेवारिगणनाशाय शूलिने ।
कपालिने नमस्तुभ्यं सर्वलोकैकपालिने ॥ ४॥

श्मशानवासिने नित्यं नमः कैलासवासिने ।
नमोऽस्तु पाशिने तुभ्यं कालकूटविषाशिने ॥ ५॥

विभवेऽमरवन्द्याय प्रभवे ते स्वयम्भुवे ।
नमोऽखिलजगत्कर्मसाक्षिभूताय शम्भवे ॥ ६॥

नमस्त्रिपथगाफेनभासिगार्द्धेन्दुमौलिने ।
महाभोगीन्द्रहाराय शिवाय परमात्मने ॥ ७॥

भस्मसंच्छन्नदेहाय नमोऽर्काग्नीन्दुचक्षुषे ।
कपर्दिने नमस्तुभ्यमन्धकासुरमर्द्दिने ॥ ८॥

त्रिपुरध्वंसिने दक्षयज्ञविध्वंसिने नमः ।
गिरिजाकुचकाश्मीरविरञ्जितमहोरसे ॥ ९॥

महादेवाय महते नमस्ते कृत्तिवाससे ।
योगिध्येयस्वरूपाय शिवायाचिन्त्यतेजसे ॥ १०॥

स्वभक्तहृदयाम्भोजकर्णिकामध्यवर्त्तिने ।

सकलागमसिद्धान्तसाररूपाय ते नमः ॥ ११॥

नमो निखिलयोगेन्द्रबोधनायामृतात्मने ।
शङ्करायाखिलव्याप्तमहिम्ने परमात्मने ॥ १२॥

नमः शर्वाय शान्ताय ब्रह्मणे विश्वरुपिणे ।
आदिमध्यान्तहीनाय नित्यायाव्यक्तमूर्त्तये ॥ १३॥

व्यक्ताव्यक्तस्वरूपाय स्थूलसूक्ष्मात्मने नमः ।
नमो वेदान्तवेद्याय विश्वविज्ञानरूपिणे ॥ १४॥

नमः सुरासुरश्रेणिमौलिपुष्पार्चिताङ्घ्रये ।
श्रीकण्ठाय जगद्धात्रे लोककर्त्रे नमोनमः ॥ १५॥

रजोगुणात्मने तुभ्यं विश्वसृष्टिविधायिने ।
हिरण्यगर्भरूपाय हराय जगदादये ॥ १६॥

नमो विश्वात्मने लोकस्थितिव्यापारकारिणे ।
सत्त्वविज्ञानरूपाय पराय प्रत्यगात्मने ॥१७॥

तमोगुणविकाराय जगत्संहारकारिणे ।
कल्पान्ते रुद्ररूपाय परापरविदे नमः ॥ १८॥

अविकाराय नित्याय नमः सदसदात्मने ।
बुद्धिबुद्धिप्रबोधाय बुद्धीन्द्रियविकारिणे ॥ १९॥

वस्वादित्यमरुद्भिश्च साध्यरुद्राश्विभेदतः ।
यन्मायाभिन्नमतयो देवास्तस्मै नमोनमः ॥ २०॥

अविकारमजं नित्यं सूक्ष्मरूपमनौपमम् ।
तव यत्तन्न जानन्ति योगिनोऽपि सदाऽमलाः ॥ २१॥

त्वामविज्ञाय दुर्ज्ञेयं सम्यग्ब्रह्मादयोऽपि हि ।
संसरन्ति भवे नूनं न तत्कर्मात्मकाश्चिरम् ॥ २२॥

यावन्नोपैति चरणौ तवाज्ञानविघातिनः ।
तावद्भ्रमति संसारे पण्डितोऽचेतनोऽपि वा ॥ २३॥

स एव दक्षः स कृती स मुनिः स च पण्डितः ।
भवतश्चरणाम्भोजे येन बुद्धिः स्थिरीकृता ॥ २४॥

सुसूक्ष्मत्वेन गहनः सद्भावस्ते त्रयीमयः ।
विदुषामपि मूढेन स मया ज्ञायते कथम् ॥ २५॥

अशब्दगोचरत्वेन महिम्नस्तव साम्प्रतम् ।
स्तोतुमप्यनलं सम्यक्त्वामहं जडधीर्यतः ॥ २६॥

तस्मादज्ञानतो वापि मया भक्त्यैव संस्तुतः ।
प्रीतश्च भव देवेश ननु त्वं भक्तवत्सलः ॥ २७॥

॥ इति ब्रह्माण्डपुराणान्तर्गता परशुरामप्रोक्ता शिवशङ्करस्तुतिः ॥

ब्रह्माण्डपुराणम् ॥ मध्यभागः ३ - उपोद्धातपादः ।
अध्यायः २५ - जाम्दग्नेयकृतशिवस्तुतिः । ५ - ३१ ॥

Encoded and proofread by Ruma Dewan

*Shivashankara Stuti*

pdf was typeset on March 8, 2023

Please send corrections to *sanskrit@cheerful.com*